दायेति च" कर्त्तुः शरीरात् पृथग्विज्ञानस्य व्यपदेश एतमेवाभिप्रायमुपोद्बलयति तस्मादणुरात्मेत्येवं प्राप्ते ब्रूमः । "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" सू० । तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति अणुरात्मेति उत्क्रान्त्याद्यश्रवणात् । परस्यैव तु ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तम् । परमेव चेद्ब्रह्मजीवस्तस्माद्यावत्परं ब्रह्म तावानेव जीवो भवितुमर्हति परस्य च ब्रह्मणो विभुत्वमाम्नातं तस्माद्विभुर्जीवः । तथा च 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु' इत्येवंजातीयका जीवविषया विभुत्ववादाः श्रौताः स्मार्त्ताश्च समर्थिता भवन्ति । नचाणोर्जीवस्य सकलशरीरगता वेदनोपपद्यते । त्वक्सम्बन्धात् स्यादिति चेन्न त्वक्कण्टकतोदनेऽपि सकलशरीरगतैव वेदना प्रसज्येत त्वक्कण्टकयोर्हि संयोगः कृत्स्नायां त्वचि वर्त्तते त्वक् च कृत्स्नशरीरव्यापिनीति पादतलएव तु कण्टकनुन्नां वेदनां प्रतिलभन्ते । नचाणोर्गुणस्य व्याप्तिरुपपद्यते गुणस्य गुणिदेशत्वात् गुणत्वमेव हि गुणिनमनाश्रित्य गुणस्य हीयेत । प्रदीपप्रभायाश्च द्रव्यान्तरत्वं व्याख्यातम् । गन्धोऽपि गुणत्वाभ्युपगमात् साश्रय एव सञ्चरितुमर्हति अन्यथा गुणत्वहानिप्रसङ्गात् । तथा चोक्तं भगवता द्वैपायनेन "उपलभ्याप्सु तद्गन्धं केचिद्ब्रूयुरनैपुणाः । पृथिव्यामेव तं विद्यादपोवायुञ्च संश्रितमिति" । यदि च चैतन्यं जीवस्य समस्तं शरीरं व्याप्नुयान्नाणुर्जीवः स्यात् चैतन्यमेव ह्यस्य स्वरूपं अग्नेरिवौष्ण्यप्रकाशौ, नात्र गुणगुणिविभागोविद्यत इति । शरीरपरिमाणत्वञ्च प्रत्याख्यातं परिशेषाद्विभुर्जीवः कथं तर्ह्यणुत्वादिव्यपदेश इति अत आह "तद्गुणसारत्वात्तु तद्व्यपदेश"इति । तस्याबुद्धेर्गुणाः तद्गुणा इच्छा द्वेषः सुखं दुःखमित्येवमादयः तद्गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे सम्भवति स तद्गुणसारः तद्भावस्तद्गुणसारत्वम् । न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति बुद्ध्युपाधिधर्म्माध्यासनिमित्तं हि कर्त्तृत्वभोक्तृत्वादिलक्षणं संसारित्वमकर्त्तुरभोक्तुश्चासंसारिणोनित्यमुक्तस्य सत आत्मनः । तस्मात्तद्गुणसारत्वाद्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः तदुत्क्रान्त्यादिभिश्चास्योत्क्रान्त्यादिव्यपदेशो न स्वतः । तथा च 'बालाग्रशतभागस्य शतधा कल्पितस्य तु । भागोजीवः स विज्ञेयः स चानन्त्याय कल्पत" इत्यणुत्वं जीवस्योक्त्वा तस्यैव पुनरानन्त्यमाह तच्चैवमेव समञ्जसं स्यात् यद्यौपचारिकमणुत्वं जीवस्य भवेत् पारमार्थिकं चानन्त्यम् । नह्युभयं मुख्यमवकल्पेत । नचानन्त्यमौपचारिकमिति शक्यं विज्ञातुं सर्व्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात् । तथेतरस्मिन्नप्युन्माने "बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रोह्यवरोऽपि दृष्ट" इति बुद्धिगुणसम्बन्धेनैवाराग्रमात्रतां शास्ति न स्वेनैवात्मना । "एषोऽणुरात्मा चेतसा वेदितव्य" इत्यत्रापि न जीवस्याणुपरिमाणत्वं शिष्यते । परस्यैवात्मनश्चक्षुराद्यनवग्राह्यत्वेन ज्ञानप्रसादावगम्यत्वेन च प्रकृतत्वात्, जीवस्यापि च मुख्याणुपरिमाणत्वानुपपत्तेः । तस्माद्दुर्ज्ञानत्वाभिप्रायमिदमणुत्ववचनमुपाध्यभिप्रायं वा द्रष्टव्यम् । तथा "प्रज्ञया शरीरमारुह्य" इत्येवंजातीयकेष्वपि भेदोपदेशेषु बुद्ध्योपाधिभूतया जीवः शरीरं समारुह्येत्येवं योजयितव्यं व्यपदेशमात्रं वा शिलापुत्रकस्य शरीरमित्यादिवत् । नह्यत्र गुणगुणिविभागो विद्यत इत्युक्तम् । हृदयायतनत्ववचनमपि बुद्धेरेव तदायतनत्वात् । तथोत्क्रान्त्यादीनामप्युपाध्यायत्ततां दर्शयति "कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि" इति "कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति" । उत्क्रान्त्यभावे हि गत्यागत्योरप्यभावो विज्ञायते, नह्यनपसृप्तस्य देहाद्गत्यागती स्याताम् । एवमुपाधिगुणसारत्वाज्जीवस्याणुत्वव्यपदेशः प्राज्ञवत् यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषूपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशः 'अणीयान्व्रीहेर्व्वा यवाद्वा, मनोमयः प्राणशरीरः सर्वगन्धः सर्वरसः सत्यकामः सत्यसंकल्पः" इत्येवं प्रकारः तद्वत्" इत्यन्तेन । इति शाङ्करानुयायिनः रामानुजमाध्वादयश्च जीवस्याणुत्वपक्षमुररीचक्रुः । तत्पक्षस्तच्छास्त्रे दृश्यः तयोर्युक्तायुक्तत्वं नैयायिकवैशेषिकाङ्गीकृतविभुत्वप्रदर्शकयुक्तीरवलोक्य सुधीभिः समर्थनीयम् न्यायसूत्रवृत्तौ चात्मनोदेहाद्यतिरिक्तत्वं प्रदर्शितं यथा "तत्रेन्द्रियं ज्ञानवन्नवेति संशये करणत्वेन सिद्धानामिन्द्रियाणां चैतन्यमस्तु लाघवात्तथा चात्मशब्दस्य नानार्थत्वादिन्द्रियाणामभौतिकत्वाद्वा न साङ्कर्य्यमितीन्द्रियचैतन्यवादिनस्तन्निराकरणायाह । "दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्" १। "न विषयव्यवस्थानात्" २ । "तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः" ३ । "शरीरदाहे पातकाभावात्" ४ । "तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात्" ५ । "न कार्य्याश्रयकर्त्तृवधात्" ६ । "सव्येन दृष्टस्येतरेण प्रत्यभिज्ञानात्" ७ । "नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभि-